बोभूयते । बोभूयांचक्रे । अबोभूयिष्ट । धातोः किं । आर्द्धधातुकत्वं यथा स्यात् । तेन बुबोधिविरिसा
दि । एकाचः किं । पुनः पुनर्जागर्त्ति । हलादेः किं । भृशमीक्षते । भृशं शोभते रोचते इत्यत्र यङ् नेति भाष्यं । पो

अङ्विधौ त्वियर्तेरिवेत्युक्तं। मा सस्मरत। मा सस्मरषातां। मा सस्मरषतेति। समार्त। समार्षातां। समार्षतेति चात्मनेपदे॥ इयर्तेर्लुङि मा सस्मर
त। मा सस्मरेतां। मा सस्मरंतेति। समारत। समारेठां। समारंतेति च। संस्मृणुते। संपश्यते। अकर्मकादित्येव। अत एव स्वस्तां सीति
पुराऽपि संस्मृणु महेश्वरं इति मुरारिप्रयोगः। प्रौढिकरत्वाट्कुः। अध्याहारो वा इति कथयन्त्यिति। अथाभिन्नकर्मकाधिकारे इह निगमा
दीनां कथमकर्मकत्वमिति चेत्। शृणु। धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया। वह
ति भारं॥ नदी वहति स्यंदते इत्यर्थः। जीवति। नृत्यति। प्रसिद्धेर्यथा [illegible] बंधं निरस्यति। निरस्यते। यथा। मेघो वर्षति। कर्मणोऽवि
वक्षातो यथा॥ हितान्न यः संस्मृणुते स किं प्रभुः। उपसर्गादस्यत्यूह्योर्वेति वाच्यं। अकर्मकादिति निवृत्तं। बंधं निरस्यति।
निरस्यते। समूहति। समूहते। उपसर्गाद्विस्तं नुहतिः। यादो विक्षिति। ब्रह्म समनुह्यति। अग्निं समुह्य। निसमुपविभ्यो ह्वः॥ नि
ह्वयते। स्पर्द्धायामाङः॥ कृष्णश्चाणूरमाह्वयते। स्पर्द्धायां किं। पुत्रमाह्वयति॥ गंधनावक्षेपणसेवनसाहसिक्यप्रति

यत्नप्रकथनोपयोगेषु कृञः।।गंधनं हिंसा।उत्कुरुते।सूचयतीत्यर्थः।।सूचनं हि प्राणवियोगानुकूलत्वाद्धिंसैव।अवक्षेप
णं भर्त्सनं।श्येनो वर्तिकामुदाकुरुते।भर्त्सयतीत्यर्थः।हरिमुपकुरुते।सेवत इत्यर्थः।।परदारान्प्रकुरुते।तेषु सहसा प्रवर्त्तते।ए
धोदकस्योपस्कुरुते।गुणमाधत्ते।गाथाः प्रकुरुते।प्रकथयति।शतं प्रकुरुते।।धर्मार्थं विनियुङ्क्ते।एषु किं।घटं करोति।अधेः
प्रसहने।प्रसहनं त्दमाभिभवश्च।।षहमर्षणेभिवेचेति पाठात्।शत्रुमधिकुरुते इत्यर्थः।अभिभवतीति वा।वेः शब्दकर्मणः।।स्व
रान्विकुरुते।उच्चारयतीत्यर्थः।।शब्दकर्मणः किं।चित्तं विकरोति कामः।।अकर्मकाच्च।।वेः कृञ इत्येव।छात्रा विकुर्वते।विकारं
लभंते।संमाननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः।।अत्रोत्संजनज्ञानविगणनव्ययाः नयतेर्वाच्याः।इ ।।९७।।
तरे प्रयोगोपाधयः।तथाहि।शास्त्रे नयते।शास्त्रस्थं सिद्धांतं शिष्येभ्यः प्रापयतीत्यर्थः।तेन च शिष्यसंमाननं फलितं।उत्
संजने।दंडमुन्नयते।उत्क्षिपतीत्यर्थः।माणवकमुपनयते।विधिना आत्मसमीपं प्रापयति।उपनयनपूर्वकेणाध्यापने

हि उपनेतरि आचार्यत्वं क्रियते। ज्ञाने। तत्त्वं नयते। निश्चिनोतीत्यर्थः। कर्मकरानुपनयते। भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः। विगणन व्ययो दत्यर्थाः। करं विनयते। राजदेयं भागं परिशोधयतीत्यर्थः। शतं विनयते। धर्मार्थे विनियुङ्क्त इत्यर्थः।
कर्तृस्थे चाशरीरे कर्मणि। नियः कर्तृस्थे कर्मणि यदात्मनेपदं प्राप्तं तच्छरीरावयवभिन्न एव स्यात्। सूत्रे शरीरशब्देन तदवयवो
लक्ष्यते। क्रोधं विनयते। अपगमयतीत्यर्थः। कर्तृस्थत्वाच्छरीरत्वाच्च रितमित इत्येव सिद्धे नियमार्थमिदं। तेनेह न।
६६ गडुं विनयति। कथं तर्हि विगणय्य नयन्ति पौरुषमिति। कर्तृगामित्वाविवक्षायां भविष्यति। वृत्तिसर्गतायनेषु क्रमः। वृत्तिर
प्रतिबन्धः। ऋचि क्रमते बुद्धिः। नप्रतिहन्यत इत्यर्थः। सर्गेत्साहः। अध्ययनाय क्रमते। उत्सहत इत्यर्थः। क्रमन्तेऽस्मिन् शास्त्राणि। स्फी
तानि भवन्तीत्यर्थः। उपपराभ्यां। वृत्त्यादिष्वेवोपपराभ्यामेव क्रमेर्नान्योपसर्गपूर्वात्। उपक्रमते। नेह। संक्रामति। आङ उद्गमने।
आक्रमते सूर्यः। ज्योतिरुद्गमन इति वाच्यं। नेह। आक्रामति धूमो हर्म्यतलात्। वेः पादविहरणे। साधु विक्रमते वाजी। पादवि

क्रमते २

हरणे किं। विक्रामति संधिः। द्विधा भवति स्फुटतीत्यर्थः। प्रोपाभ्यां समर्थाभ्यां।। समर्थौ तुल्यार्थौ। शकं धादित्वात्परस्मैपं। प्रारंभेऽनयोस्तु
५८ ल्यार्थता।। प्रक्रमते उपक्रमते। समर्थाभ्यां किं। प्रक्रामति। प्रगच्छतीत्यर्थः। उपक्रामति। आगच्छतीत्यर्थः। अनुपसर्गाद्वा।। क्रामति क्रमते। अप्राप्त
विभाषेयं। ह्रस्वादौ तु नित्यमेव। अपह्नवे ज्ञः।। शतमपजानीते। अपलपतीत्यर्थः।। अकर्मकाच्च।। सर्पिषो जानीते। सर्पिषा उपायेन
प्रवर्तत इत्यर्थः। संप्रतिभ्यामनाध्याने।। शतं संजानीते। अवेक्षत इत्यर्थः।। शतं प्रतिजानीते। अंगीकरोतीत्यर्थः।। अनाध्यान इति योगो वि
भज्यते। तत्सामर्थ्यादकर्मकाच्चेति प्राप्तिरपि वार्यते। मातरं मातुर्वा संजानाति। कर्मणः शेषत्वविवक्षायां षष्ठी।। भासनोपसंभा
षाज्ञानयत्नविमत्युपमंत्रणेषु वदः। उपसंभाषोपमंत्रणे धातौ। वर्ण्यर्थेतरे प्रयोगोपाधयः। शास्त्रे वदते। भासमानो ब्रवीतीत्यर्थः। ।।९८।।
उपसंभाषोपसांत्वनं। भृत्यानुपवदते। सांत्वयतीत्यर्थः। ज्ञाने। शास्त्रे वदते। क्षेत्रे वदते। विमतौ। क्षेत्रे विवदंते। उपमंत्रण
मुपच्छंदनं। उपवदते। प्रार्थयत इत्यर्थः।। व्यक्तवाचां समुच्चारणे।। मनुष्यादीनां संभूयोच्चारणे वदेरात्मनेपदं स्यात्।।–

यत्नेर

कि२

संप्रवदंते ब्राह्मणाः। नेह। संप्रवदंति खगाः॥ अनोरकर्मकात्॥ व्यक्तवाग्विषयादनुपूर्वादकर्मकाद्वदेरात्मनेपदं स्यात्। अनु
वदते कठः कलापस्य। अकर्मकात् किं। उक्तमनुवदति। व्यक्तवाचां किं। अनुवदति वीणा। विभाषा विप्रलापे। विरुद्धोक्तिरूपे व्यक्तवा
चां समुच्चारणे उक्तं वा स्यात्। विप्रवदंते विप्रवदंति वा वैद्याः। अवाद्ग्रः। अवगिरते। गृणातिस्त्ववपूर्वेन प्रयुज्यत एवेत्यभिप्रायः॥ ति२
समः प्रतिज्ञाने। शब्दं नित्यं संगिरते। प्रतिजानीत इत्यर्थः। प्रतिज्ञाने किं। संगिरति ग्रासं। उदश्चरः सकर्मकात्। धर्ममुच्चरते। उ
ल्लंघ्य गच्छतीत्यर्थः॥ सकर्मकात् किं। बाष्पमुच्चरति उपरिष्टाद्गच्छतीत्यर्थः॥ समस्तृतीयायुक्तात्। रथेन संचरते। दाणश्च सा चेच्चतु
र्थ्यर्थे। संपूर्वो दाणः तृतीयांतेन युक्तादुक्तं स्यात् तृतीया चेच्चतुर्थ्यर्थे। दास्या संयच्छते। पूर्वसूत्रे समस्त इति षष्ठी॥ तेन सूत्रद्वयमिद
मव्यवहितेऽपि प्रवर्तते। रथेन समुदाचरते। दास्या संप्रयच्छते। उपाद्यमः स्वकरणे। स्वकरणं स्वीकारः॥ भार्यामुपयच्छते। विभा
षोपयमने। यमः सिच्च किद्वा स्याद्विवाहे। रामः सीतामुपायत। उपायंस्त वा। ऊढवानित्यर्थः॥ गंधनांगे उपयमे तु। पूर्ववि प्र

कि१

११

ष्ठ्र लं छ्र केर श्रुवः॥ख्यास्यां

प्रतिषेधान्नित्यं॥ किसं॥ ङ्ग शास्त्रमादृशासन सन्नंतानामेषां प्राग्वत्॥ धर्मंजिज्ञासते॥ शुश्रूषते॥ सुस्मूर्षते॥ दिदृक्षते॥ नानो

र्ज्ञः॥ पुत्रमनुजिज्ञासति॥ पूर्ववत्सनस्यैवायं निषेधः॥ अनंतरस्येति न्यायात्तेनेह न॥ सर्पिषो जिज्ञासते॥ सर्पिषा प्रवर्तितुमिच्छ

तीत्यर्थः॥ पूर्ववत्सन इति तङ्॥ अकर्मकाच्चेति प्रवृत्ता द्विधानात्॥ प्रत्याङ्भ्यां सनंता श्रुवः॥ उक्तं न स्यात्॥ प्रतिशुश्रूषति॥

कर्मप्रवचनीयात्स्यादेवदेवदत्तं प्रतिशुश्रूषते॥ शदेः शितः॥ म्रियतेर्लुङ्लिङोश्च॥ आभ्यां लात्॥ पूर्ववत्सनः॥ सनः पूर्वो

यो धातुस्तेन तुल्यं सन्नंतादप्यात्मनेपदं स्यात्॥ एहि दिधिषते॥ शिशत्यिषते॥ निविविक्षते॥ पूर्ववच्च लिङ्॥ बुभूषति॥ शदेरित्या

दि सूत्रेषु स्येनेति तङ्नुवर्त्य वा स्वस्व क्रमभेदेन॥ व्याख्येयं॥ तेनेह न॥ शिशत्सति॥ मुमूर्षति॥ आम्प्रत्ययवत्कृञोनुप्रयो ॥श्री॥

गस्य॥ एधांचक्रे॥ प्रोपाभ्यां युजेरयज्ञपात्रेषु॥ प्रयुंक्ते॥ उपयुंक्ते॥ स्वराद्यंतोपसर्गादिति वक्तव्यं॥ उद्युंक्ते॥ वियुंक्ते॥ अयज्ञ

पात्रेषु किं॥ द्वंद्वं न्यंचि पात्राणि प्रयुनक्ति॥ समः क्ष्णुवः॥ संक्ष्णुते शस्त्रं॥ भुजोऽनवने॥ ओदनं भुंक्ते॥ आप वेहरती त्यर्थः॥

बुभुजे पृथिवीपालः पृथ्वीवीमेव केवलां। वृद्धो ऽङ्गनो दुःखशतानि भुङ्क्ते। इहोपभोगो भुजेरर्थः महीं। अनवने किं। महीं
भुनक्ति। णिगरणेय [blot] कर्मणो चेत्स कर्त्ता नाध्याने। ण्यन्ता दात्मनेपदं स्यात् रणौ याक्रिया सैव चेण्यन्ते नोच्यते तदणौ यत्कर्मका
रकं स चेण्णौ कर्त्ता स्यान्न त्वाध्याने। णिचश्चेति सिद्धे ऽकर्त्रभिप्रायार्थमिदं। कर्त्रभिप्राये तु विभाषोपपदेनेति विकल्पो ऽणा
वकर्मकादिति परस्मैपदे चेपरत्वात्प्राप्ते पूर्वविप्रतिषेधेनेदमेवेष्यते। कर्तृस्थभावकाः कर्तृस्थक्रियोऽस्योदाहरणं। त
याहि। पश्यन्ति भवं भक्ताः। चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः॥ प्रेरणं ण्यन्तागे पश्यन्ति भवः विषयो भवन्तीत्यर्थः। ततो हे
तुमणिचूदर्शयन्ति भवं भक्ताः पश्यन्तीत्यर्थः। पुनर्ण्यर्थस्याविवक्षायां॥ दर्शयते भवः। इह प्रथमतृतीययोरवस्थयोर्द्वि
तीयचतुर्थ्योस्तुल्योऽर्थः। तत्र तृतीयकक्षायां न तङ्। क्रियासाम्येपणे कर्मकारकस्य णौ कर्तृत्वाभावात्॥ चतुर्थ्यां
तु तङ्। द्वितीयामादाय क्रियासाम्यात्। प्रथमायां कर्मणो भवस्येह कर्तृत्वाच्च। एवमारोहयते हस्तीत्यपि उदाहरणं।

100

आरोहंतिहस्तिनं हस्तिपकाः। नागमावयंतीत्यर्थः॥ ततआरोहंतिहस्ती नागम्भावतीत्यर्थः॥ ततोऽपि वाआरोहयति। आरोहंती
त्यर्थः॥ ततआरोहयते नाम्भवतीत्यर्थः॥ यद्वा। पश्यंत्यारोहंतीति प्रथमकक्षा प्रागुक्ता। ततः कर्मण एव हेतुत्वारोपात्
द्वाहृश्यति भवः। आरोहयति हस्ती। पश्यत्तआरोहं तत्र प्रेरयतीत्यर्थः॥ ततोऽपि चूभांतत्वकृतिर्णां च उपात्तयोर्द्वयोर्
रपि प्रेषणयोस्त्यागे दर्शयते आरोहयतेइत्युदाहरणं। अर्थः प्राग्वत्। अस्मिन्नारोहद्वितीयुकक्षायानंतरं। समानत्रि
यत्वाभावास्मिऽर्थसाधिक्यात्। अनाध्यानेकिं। स्मरतिवनगुल्मं कोकिलः। स्मरयत्येनं वनगुल्मः। उत्कंठा एव
क्तस्तेविषयोभवतीत्यर्थः। भीस्म्योर्हेतुभये। व्याख्यातं। गृधिवंच्योः प्रलंभने। प्रतारणेऽर्थे णिचंताभ्यामाभ्यां प्राग्वत्। माणव
कं गर्द्धयति। वंचयते वा। प्रलंभने किं। श्वानं गर्द्धयति॥ अभिकांक्षामस्योत्पादयतीत्यर्थः। अहिं वंचयति। वर्जयतीत्यर्थः। ॥१८८॥
लियः सम्मानन शालीनीकरणयोश्च। व्याख्यातं॥ मिथ्योपपदात्कृञोऽभ्यासे। णेरितो वा। पदं मिथ्याकारयते। स्वरादिदुष्ट

नात्मनुखतेः

मसकृदुच्चारयतीत्यर्थः ॥ मिथ्योपपदात्किं । पदं सुष्ठु कारयति । अभ्यासे किं । सकृत्पदं मिथ्या कारयति । स्वरितञितः कर्त्रभि-
प्राये क्रियाफले । यजते । सुनुते । कर्त्रेति किं । ऋत्विजो यजंति । सुन्वंति । अपाद्वदः ॥ न्यायमपवदते । कर्त्रभिप्राय इत्येव । अ-
पवदति । णिचश्च ॥ कारयते । समुदाङ्भ्यो यमोऽग्रंथे । अग्रंथ इति च्छेदः । व्रीहीन्संयच्छते । वस्त्रमानयच्छते । अग्रंथे किं । उद्यच्छ-
ति वेदं । अधिगंतुमुद्यमं करोतीत्यर्थः । कर्त्रभिप्राय इत्येव । अनुपसर्गाज्ज्ञः ॥ गां जानीते । अनुपसर्गात्किं । स्वर्गं लोकं

लि॰

न प्रजानाति । कथं तर्हि भट्टिः इत्थं नृपः पूर्वमवालुलोके ततोऽनुजज्ञे गमनं सुतस्येति । कर्माणि लिट् । नृपेणेति विपरि-
णामः ॥ विभाषोपपदेन प्रतीयमाने । स्वरितञित इत्यादि पंचसूत्र्यात्मनेपदं विहितं तत्समीपोच्चारितेन पदेन क्रिया-
फलस्य कर्तृगामित्वे द्योतिते वा स्यात् । स्वं यज्ञं यजति । यजते वा । स्वं कटं करोति कुरुते वा । स्वं पुत्रमपवदति अपवद-
ते वा । स्वं यज्ञं कारयति कारयते वा ॥ स्वं व्रीहिं संयच्छति संयच्छते वा । स्वां गां जानाति जानीते वा । इत्यात्मनेपदं ॥ —

शेषात्कर्त्तरि परस्मैपदं। अत्ति। अनुपराभ्यां कृञः॥ कर्त्तृगेपि फले गंधनादौ च परस्मैपदार्थमिदं। अनुकरोति। पराक
१०। रोति। कर्त्तरीत्येव। भावकर्मणोर्मा भूत्। न चैवं णिच एकमकर्त्तरि प्रसंगः। कार्यातिदेशपक्षस्याभ्युपगततया तत्र कर्मवत्कर्मणेत्या
त्मनेपदेन परेण स्य बाधात्॥ शास्त्रातिदेशपक्षे तु कर्त्तरित्यत्र शेषादित्यतश्च कर्त्तृग्रहणद्वयमनुवर्त्त्यैकं कर्त्तृत्वेयः क
र्त्रा न तु कर्मकर्त्रीति चेति व्याख्येयं॥ अभिप्रत्यतिभ्यः क्षिपः॥ क्षिप प्रेरणे स्वरितेत्॥ प्राद्वहः॥ प्रवहति। परेर्मृषः॥ परिमृष्य
ति। दैवादिकस्य परिमर्षति। इह परेरिति योगं विभज्य वहेरपीति केचित्॥ व्याङ्परिभ्यो रमः॥ विरमति। उपाच्च। यज्ञदत्तमु
परमति॥ उपरमयतीत्यर्थः॥ अंतर्भावितण्यर्थोयं॥ विभाषाऽकर्मकात्॥ उपाद्रमेरकर्मकात्परस्मैपदं वा। उपरमति
उपरमते वा॥ निवर्त्तत इत्यर्थः॥ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः। एभ्यो ण्यंतेभ्यः परस्मैपदं स्यात्॥ णिचश्चेत्यस्यापवादः॥ ॥२०१॥
बोधयति पद्मं। योधयति काष्ठानि। नाशयति दुःखं। जनयति सुखं। अध्यापयति। प्रावयति। प्रापयतीत्यर्थः। द्रा

वपति। विलापयतीत्यर्थः। स्रावयति स्यंदयतीत्यर्थः। निगरणचलनार्थेभ्यश्च। निगारयति। आशयति। भोजयति।
चलयति। कंपयति। अदेः प्रतिषेधः। आदयते देवदत्तेन। गतिबुद्धीति कर्मत्वमप्यदिखाद्योर्नेति प्रतिषिद्धं। निगर
ने णचलनेति सूत्रेण प्राप्तस्यैवायं निषेधः। शेषादित्यकर्त्रभिप्राये परस्मैपदं स्यादेव। आदयत्यन्नं वटुना। अण
वकर्मकाच्चित्तवत्कर्तृकात्। एण्यंतात्परस्मैपदं स्यात्। शेते कृष्णः। तं गोपी शाययति। न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवद
वसः। एभ्यो ण्यंतेभ्यः परस्मैपदं न। धेट् वत्तिर्निगरणार्थः। इतरे चित्तवत्कर्तृकाकर्मकाः। नृतिश्चलनार्थोऽपि तेन सूत्रद्वयेन प्राप्तिः।
य पाययते। दमयते। आयामयते। आयासयते। परिमोहयते। रोचयते। नर्तयते। वादयते। वासयते। धेट उपसंख्यानं। धापयेते।
शिशुमेकं समीची। अकर्त्रभिप्राये शेषादिति परस्मैपदं स्यादेव। वत्सान्पाययति पयः। दमयत्यकमनीयतामदं। भि
य क्षावासयति। वाक्यषः। लोहितायति। लोहितायते। द्युद्भ्यो लुङि। अद्युतत्। अद्योतिष्ट। वृद्भ्यः स्यसनोः। वर्त्स्यति।

वर्तिष्यते। विवृत्सति। विवर्तिषते। वृतु इति चतुष्पः। कल्प्तासि। कल्पितासे। कल्प्स्यति। कल्पिष्यते। चिक्लृप्सति। चिकल्पिषते। चिक्लृ
प्सते। इति पदव्यवस्था। अथ भावकर्मणोर्लुडादयः। भावकर्मणोरिति लङ्। सार्वधातुके यक्। धातोर्यक् प्रत्ययः स्याद्भावक
र्मणोरिति सार्वधातुके परे। भावो भावना। उत्पादना। क्रिया। सा च धातुत्वेन सकलधातुवाच्या भावार्थकत्वकारणान्न
द्यते। युष्मदस्मद्भ्यां समानाधिकरण्याभावात्प्रथमपुरुषः। तिङ्वाच्यभावनाया असत्वरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि किं
त्वेकवचनमेव। तस्यौत्सर्गिकत्वेन संख्यानपेक्षत्वात्। अनभिहिते कर्तरि तृतीया। त्वया मयान्यैश्च भूयते। बभूवे। अस्य सत्त्वीयु
रत्ता। स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च। उपदेशे योऽच् तदन्तानां हनादीनां च चिणीवाङ्गं कार्यं वा स्यात्स्यादिषु
परेषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च। अयमिट् चिण्वद्भावसन्नियोगशिष्टत्वात्तदभावेन। इडाहार्द्धधातुकं त्याधि ॥ १०२॥॥
कृतं सीयुड्विशेषणं तेनेह व्यभिचारात्॥ चिण्वद्भावाद्वृद्धिः। भाविता। भविता। भाविष्यते। भविष्यते। हपतां। अभ

यत्। भावयेत्। भाविषीष्ट। भविषीष्ट। चिण्भावकर्मणोः। ल्ले स्विण्स्याद्भावकर्मवाचिनि तशब्दे परे। अभावि। अभाविष्यत।
अभविष्यत। तिङोक्त्वा कर्मणि निमित्तं द्वितीया। अनुभूयते आनन्दः श्चैत्रेण त्वया मया च। अनुभूयेते। अनुभूयन्ते। त्वमनुभू
यसे। अहमनुभूये। अन्वभावि। अन्वभाविषातां। अन्वभविषातां। णिलोपः। भाव्यते। भावयांचक्रे। भावयां। बभूवे।
भावयामासे। इहतत्र शब्दस्य एशि इट् एत्वे च कृते। हयतीति हल्त्वं न। तासिस्यसीयुट् चयोदस्तैरपि व्याप्तिहेतुः त्यादौ सार्वधातु
के एति हल्त्वस्य ष्टुत्वेत्ररित्याहुः। भाविता। चिण्वदिट् आभीयत्वेनासिद्धत्वाण्णिलोपः। पक्षे भावयिता। भाविष्यते। भाव
यिष्यते। भाव्यतां। अभाव्यत। भाव्येत। भाविषीष्ट। भावयिषीष्ट। अभावि। अभाविषातां। अभावयिषातां। बुभूष्यते।
बुभूषांचक्रे। बुभूषिता। बुभूषिता। बुभूषिष्यते। बोभूयते। यङ्लुगन्तात्तु बोभूयते। बोभवांचक्रे। बोभविता। बोभावि
विता। अहं स्नामीति दीर्घः। स्तूयते विष्णुः। तुष्टुवे। स्ताविता। स्तोता। स्ताविष्यते। स्तोष्यते। अस्तावि। अस्ताविषातां।

१८३ अस्तोषातां गुणो नेति गुणः॥ अर्यते स्मर्यते स्मरे। परत्वान्नित्यत्वाच्च गुणे रपरे कृते ऽतं तत्वाभावे पुर्वदेवाय हणादिण्व दिरु
आरिता अर्ता स्मारिता। स्मर्ता गुणो नेत्यत्र निन्यायहणादिंतु हेत्वेव त्वान्ने हगुणः। संस्क्रियते। अनिदितामिति नलोपः। स्व
103 राम स्यते। इदितस्कन्नं येते॥ संप्रसारणं। कृज्यते। अयग्नि हिनि धाप्यते। तनोतेर्यकि। आकारो ना देशो वा स्यात्। तायते। तन्यते। येवि
विभाषा। जायते जन्यते। तपो ऽनुपेचते। तपश्च एनस्यात्कर्मकर्तरिश्रुतुतापेचा। अन्वतप्त पापेन। पापं कर्तृ तेनाम्याहतस्त्वर्थः
कर्मणिलुङ्। यद्वा। पापेन पुंसा कर्त्रा अविशेषो। धुमास्थेतीत्वं दीयते। धीयते। अदेवइत्यत्र शितीतिकर्मधास्यादिसंज्ञके
कशकारादौ निषेधं। एदीनोऽप्रादिशित्वाभावात्। स्मिन्नात्वं उस्ले। आतो युक्चिण्कृतः॥ आदन्तानां युगागमः स्याच्चिणि ञिति
कृति च। दायिता। दाता। दायिषीष्ट। दासीष्ट। अदायि। अदायिषातां। अदिषातां। अधायिषातां। अधिषातां। अस्त्रायिषातां। अस्ना ॥१०३॥ ॥
सातां। हन्यते। अविस्मृतो रित्युक्ते। हं न स्तोन। होहंतेति कुत्वो। घानिता। हंता। घानिष्यते। हनिष्यते। आशिषि लिङिवधादे
शस्यापवादस्त्विण्वद्भावः॥ अङ्ग्रधात्तुके साद्युरालिस्वशेषविहितत्वात्। घानिषीष्ट। प्रच्छेवधिषीष्ट। अघानि। अघा

रि॰

नि। अघानिषातां। अहसातां। पक्षे वधादेशः। अवधि। अवधिषातां। अघानिष्यत। हेऽहनिष्यत।। न च स्यादिषु चिण्वदित्यति
देशात् वधादेशः स्यादिति वाच्यं। अंगस्येत्यधिकारादंगस्यैवातिदेशात्। गृह्यते। चिण्वदियो न दीर्घत्वं। प्रकृतसूत्रेणादि
लक्षणस्यैवेटो ग्रहोऽलिटि दीर्घ इत्यनेन दीर्घविधानात्। ग्राहिता। ग्राहिष्यते। ग्रहीष्यते। ग्राहिषीष्ट। ग्रहीषीष्ट। अग्राहि। अग्रा
हिषातां। अग्रहीषातां। दृश्यते। अदर्शि। अदर्शिषातां। सिचः कित्त्वादम्। अदृक्षातां। गिरतेस्तङि लुङि उः ध्वमिचतुरधिकं शतं।
तथा हि चिण्वदिटो दीर्घो नेत्युक्तं। अगारिषातां। द्वितीयेऽलिटि इति दीर्घोऽवेति वा दीर्घः। अगरीषातां। अगरिषातां। एषां त्रयाणां लत्वं हु
त्वं द्विलत्रयं चेति पंचवैकल्पिकानि। इत्थं षण्णवतिः। लिङ्सिचोरिति विकल्पादिडभावे उश्चेति कित्त्वं। इत्वं। रपरत्वं। हलि
चेति दीर्घः। रुणः षीध्वमिति नित्यं ढत्वं। अगीर्ढ्वं। एवमानां द्वित्वविकल्पेऽष्टौ। एकषण्णवत्या सह संकलने अष्टोत्तरशतं सं
ख्येति। इट्पक्षे दीर्घाभाव एव द्वि... रूपत्वं ढत्वं द्वित्वविकल्पेन पापूरत्यष्टानां विकल्पेन चतुर्भिरधिकं शतं।। हे तु मतं पतलक

मिलः। ऋकुणिल्लाय॥ शम्यते मो हो तु कुंदेन। चिणमुलोदीर्घोन्यतरस्यां॥ चिण्परे णमुल्परे च णौ मितां तु यथा। या दीर्घो वा स्यात्॥ प्र
164 क्तो मितां ह्रस्व एव तु उ विकल्पितः। एवं ताभ्यां ह्रस्वविकल्पाभ्यां सिद्धं॥ दीर्घविधौ। हि णिचो लोपो न स्थानिवदिति दीर्घः सिद्ध्यति।
ह्रस्वविधौ तु स्थानिवत्त्वं दुर्वारं। नाप्येतु पूर्वत्रासिद्धं न स्थानिवदिति त्वचष्टम्भ द्विर्वचन सवर्णानुस्वार दीर्घजश्चरः चर्त्वा स्था
नाः॥ एवं त्विति ज्ञापित परो निर्देशः। दीर्घग्रहणं चेदं मा भूदिति सूत्रे राज्यः। शमिता। शमिता। शमयिता। शमिष्यते। शमिष्यते। शाम यिष्यते
यङंतात् शिच्। शं शाम्यते। शंशामिता। यङ्लुगतात् णिच्यप्येवं। भाष्यमते तु यङन्तात् णिच् परत्वाद्वृद्धिः दीर्घो नास्तीति विशेषः। एव ॥१८७॥
तं लोभावे। शाम्यते मुनिना। नोदात्तोपदेशस्य मान्तस्यानाचमेः॥ उपधाया वृद्धिर्न स्याच्चिणि णमुलि कृति च। अशमि। उदा = कति ३
त्तोपदेशस्येति किं। अगामि। मान्तस्य किं। अवादि। अनाचमेः किं। आचामि। अनाचमिकमिवमीनामिति
वक्तव्यं। चिणि। आयादस्यादिति णिजभावे औकामि। णिङ् णिचौ रप्येवं॥ अवामि। वध हिंसायां। हलंतः॥

त्रनिवध्योरिति न वृद्धिः ॥ अवधि । जाये । विवि लल्डित्त्वस्थित्युक्तेर्न गुणः ॥ अजागरि । भंजेश्च चिणि न लोपो वा स्यात् । अ
भाजि । अभंजि । विभाषा चिण्णमुलोः ॥ लभेर्नुमागमो वा स्यात् स्यात् ॥ अलंभि । अलाभि । व्यवस्थितविकल्पादनेनेत्यं नुम् ॥
प्रालंभि । द्विकर्मणां तु । गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहां । बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया ॥
प्रयोज्यकर्मण्यन्येषां ण्यंतानां लादयो मताः ॥ गौर्दुह्यते पयः । अजा ग्रामं नीयते ह्रियते कृष्यते उह्यते । बोध्यते माणवकं धर्मः ॥ ना ४
माणवको धर्ममिति वा । देवदत्तो ग्रामं गम्यते । अकर्मकाणां कालादिकर्मकाणां कर्मणि भावे च लकारश्च घ्यते । मासो
मासं वा आस्यते देवदत्तेन ॥ णिजंतानु प्रयोज्ये प्रत्ययः । मासमास्यते माणवकः । यद्दासो करोति शयं द्योतयितुं कर्तृव्या
पारेण विवक्ष्यते तदा कारकांतराण्यपि कर्तृसंज्ञां लभंते । स्वव्यापारे स्वतंत्रत्वात् ॥ तेन सर्वकरणादिसत्त्वेपि संप्रति
कर्तृत्वात् कर्तरि लकारः । साध्वसिश्छिनत्ति । काष्ठानि पचंति । स्थाली पचति ॥ कर्मणस्तु कर्तृत्वविवक्षायां

॥ इति भावकर्मप्रक्रिया ॥ ३

॥स० त्ति०॥

105

ॐ

प्राक्तकर्मकाअपि प्रायेणाकर्मकाः। तेभ्यो भावे कर्त्तरि च लकाराः। पच्यते ओदनेन। भिद्यते काष्ठेन। कर्त्तरि तु। कर्मकर्त्तृकर्मणा तु
ल्यक्रियः। कर्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्मवत्स्यात्। कार्यातिदेशोऽयं। तेन यगात्मनेपदचिण्चिण्वदिटः स्युः। कर्त्तुरभिहि
तत्वात्प्रथमा। पच्यते ओदनः। भिद्यते काष्ठं। अपाचि। अभेदि। न तु भावे लकारे कर्त्तुर्द्वितीया स्यात्। अस्मादतिदेशादिति चेन्न।
उकारवाच्य एव कर्त्ता कर्मवत्। लिङ्याशिष्यङिति द्विलकारकात् इत्यनुवृत्तेः। भावप्रत्यये च कर्त्तुर्लकारेणानुपस्थितेः। अत
एव कृत्यक्तखलर्थाः कर्मकर्त्तरि न भवंति। किंतु भावे एव। भेत्तव्यं कुसूलेन। ननु पचिभिद्योः कर्मस्था क्रिया विक्लित्तिर्द्वैधीभव
नं च। सैवेदानीं कर्त्तृस्था न तु तत्तुल्या। सत्यं। कर्मत्वकर्तृत्वावस्थाभेदोपाधिकं तत्समानाधिकरणक्रियाया भेदमाश्रित्य ॥१०५॥
व्यवहारः। कर्मणेति किं। करणाधिकरणाभ्यां तु तुल्यक्रियेष्वेवं सिद्धे साध्वसिश्छिनत्तौ मा भूत्। किंच कर्तृस्थक्रियेभ्यो
मा भूत्। गच्छति ग्रामं। आरोहति हस्ती। अधिगच्छति शास्त्रार्थः। स्मरति श्रद्दधाति च। यत्र कर्मणि क्रियाकृतो विशेषो
दृश्यते। यथा पक्वेषु तंडुलेषु यथा वा छिन्नेषु काष्ठेषु तत्र कर्मस्था क्रिया न तु तत्र। न हि पक्वापक्वतंडुलेष्विव गतागतयो

मेषु वैलक्षण्यमुपलभ्यते। करोतिरुत्पादनार्थः॥ उत्पत्तिश्च कर्मस्था। तेन कारिष्यते घट इत्यादि। यत्नार्थत्वे तु नैतत्सिध्येत्। ना
नेच्छादिवद्यत्नस्य कर्तृस्थत्वात्। एतेनानुव्यवस्यमानेर्थे इति भाष्यात्। कर्तृस्थत्वेन यगभावाच्च अनिकृते ओलोपौ च रूपसिद्धेः।
त्वाच्छीस्यादावयं चानश्नत्वात्मनेपदं। सकर्मकाणां प्रतिषेधो वक्तव्यः। अन्योन्यं स्पृशतः। अजा ग्रामं नयति। दुहिपच्योर्ब
हुलं सकर्मकयोरिति वाच्यं॥ न दुहस्नुनमां यक्चिणौ। एषां कर्मकर्तरि यक्चिणौ न स्तः। दुहेः एनेनयक एव निषेधः॥ चिण्तु
विकल्पेन घातोयापशालुक्। गौः पयो दुग्धे। अचः कर्मकर्तरि। अजंतात् क्लिश्चिण्वा स्यात्कर्मकर्तरि तशब्दे परे॥ अकारि। अकृत।
दुहश्च। अदोहि। पक्षे क्सः। लुग्वा दुहदिहलिहगुहामिति लुक्। अदुग्ध। अधुक्षत। उदुंबरः फलं पच्यते। सृजियुजोः श्यंस्तु। अनयोः सकर्मकयोः
कर्तुर्बहुलं कर्मवत्त्वं यगपवादश्च श्यन्वाच्य इत्यर्थः। सृजेः श्रद्धोपपन्ने कर्तर्येवेति वाच्यं। सृज्यते स्रजं भक्तः। श्रद्धया निष्पा
दयतीत्यर्थः। असर्जि। युज्यते ब्रह्मचारी योगं। भूषाकर्मकिरादिसनां चान्यत्रात्मनेपदात्। भूषावाचिनां किरादीनां सन्नंता

नोक्किसदीनां रचयकृचिणो चिण्वदिट् चेनेति वाच्यमित्यर्थः। अलंकुरुते कन्या। अलमकृत॥ अवकिरते हस्ती। अवाकीर्ष्ट। गिरते। अगी
र्ष्ट। आद्रियते। आदृत। किरादिभ्यो दार्ढ्यं तर्गणः॥ चिकीर्षते कटः। अचिकीर्षिष्ट। इच्छायाः कर्तृस्थत्वेऽपि कर्मस्थक्रियापेक्षमिह
106 कर्मस्थक्रियत्वं। न रुधः। अस्मात् तन्न चिण्वत्। अवारुद्ध गौः। कर्मकर्तरीत्येव। अवारोधि गौर्गोपेन। तपस्तपःकर्मकस्यैव। कर्ता
कर्मवत् स्यात्॥ विध्यर्थमिदं। एवकारस्तु व्यर्थ एवेति रक्षानुसारिणः॥ तप्यते तपस्तापसः। अर्जयतीत्यर्थः। तपोऽनुतापे च
प्र॰ ति णिनिषेधात्सिच्। अन्वतप्त। तपःकर्मकस्येति किं। उत्तपति सुवर्णं सुवर्णकारः॥ न दुहस्नुनमां यक्चिणौ। प्रस्नुते। प्रास्नावि ष्ट।
प्रास्नोष्ट। नमते दण्डः। अनंस्त। अन्तर्भावितण्यर्थोऽत्र नमिः। यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानं। कार ॥१०६॥
यते। अचीकरत। उच्छ्रूपते दण्डः। उदशिश्रियत। चिण्वदिट् तु स्यादेव। कारिष्यते॥ उच्छ्रायिष्यते॥ ब्रूते कथा। अवोचत। भारद्वाजी
याः पठन्ति। णिश्रिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानं। पुच्छमुद्यते गौः॥ अन्तर्भावितण्यर्थतायां॥ उत्पुच्छयते गां। पुनः कर्मे

दस्यति उत्पुच्छ

त्वविवक्षायां उत्पुच्छयते गौः ॥ उदपुपुच्छत ॥ रुक्मिणीः चलिपिधोच्छ्रङ्गौ ॥ श्रंथि ग्रंथ्यो राद्धं षीयुक्ता भिङ्भावपक्षे यहणं ।
ग्रंथ्यति ग्रंथं स्वयं श्रंथति मेखलां देवदत्तः ॥ ग्रंथते ग्रंथः ॥ श्रथ्यं चिष्ठः श्रथ्यते ॥ श्रंथि ष्ठ ॥ कैयादिकयोस्तु ॥ श्रथ्नीते ग्रथ्नीते स्व
यमेव ॥ विकुर्वते सैंधवाः ॥ वल्गंतीत्यर्थः ॥ वेः शब्दकर्मणो ऽकर्मकाच्चेति तङ् ॥ अंतर्भावितण्यर्थस्य पुनः प्रेषणत्यागे विकुर्वते सैं
धवाः ॥ अकारिष्ट ॥ अकारिषातां ॥ अकारिषत ॥ अकृत ॥ अकृषातां ॥ अकृषत ॥ कुषिरंजोः प्राचां श्यन् परस्मैपदं च ॥ अनयोः कर्म
कर्तरि नयुक् किंतु श्यन् परस्मैपदं च ॥ आत्मनेपदापवादः ॥ कुष्यति ॥ कुष्यते पादः ॥ कुष्यति ॥ कुष्यते पादः ॥ रज्यति रज्यते वस्त्रं ॥ यगवि
षये तु नास्य प्रवृत्तिः ॥ कोषिषीष्ट ॥ रंक्षीष्ट ॥ इति कर्मकर्तृप्रक्रिया ॥ अभिज्ञावचने लृट् ॥ स्मरति बोधने उपपदे भूतानद्यतने
धातोर्लृट् स्यात् लङोऽपवादः ॥ स्मरसि कृष्ण गोकुले वत्स्यामः ॥ एवं बुध्यसे चेतयसे इत्यादियोगेपि तेषामपि प्रकरणादिवसेन स्मृतौ
वृत्तिसंभवात् ॥ न यदि ॥ यद्योगे उक्तं न ॥ अभिजानासि कृष्ण यद्वने ऽभुञ्ज्महि ॥ विभाषा साकांक्षे ॥ उक्तविषये लृड् वा स्यात् साकांक्षे

का ८

स्म:

ण भाविनसा कोऽप्यच्छेद्वाक्यार्थः। स्मरसि कृष्ण वने वत्स्यामः॥ तत्र गाश्चारयिष्यामः। वा साकाङ्क्षे लक्षणं वा रणं तत्त्वं। पक्षे लङ्। यच्छ इयोगे पि न यदीति

बाधित्वा परत्वाद्विकल्पः॥ परोक्षे लिट्। चकार। उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यं॥ सुप्तोऽहं किल विललाप बहु जगद पुरस्तात्तस्य म

107 त्ताकिलाहं॥ अत्यन्तापह्नवे लिड् वक्तव्यः॥ कलिङ्गेषु वात्सीः॥ नाहं कलिङ्गान् जगाम॥ हशश्वतोर्लङ् च। अनयोरुपपदयोर्लिड्विषये ल

ङ् स्याच्चाल्लिट्। इति हाकरोच्चकार वा। शश्वदकरोच्चकार वा॥ प्रश्ने चासन्नकाले॥ प्रष्टव्यः प्रश्नः। आसन्नकाले पृच्छ्यमाने धातोर्लिड्वि

षये लङ् लिटौ स्तः॥ अगच्छत् किं। जगाम किं। अनासन्ने तु कंसं जघान किं। लट् स्मे। लिटोऽपवादः। यजति स्म युधिष्ठिरः। अपरोक्षे च।

भूतानद्यतने लट् स्यात् स्मयोगे। एवं स्म पिता ब्रवीति॥ ननौ पृष्टप्रतिवचने॥ अनद्यतनपरोक्ष इति निवृत्तं। भूते लट् स्यात्। अकार्षीः किं। ॥१०७॥

ननु करोमि भोः॥ नन्वोर्विभाषा॥ अकार्षीः किं। न करोमि ना कार्षं। अहं नु करोमि। अहं न्वकार्षं। पुरि लुङ् चास्मे। अनद्यतनग्रहणं मण्डूकप्लुत्या

नुवर्तते॥ पुराशब्दयोगे भूतानद्यतने विभाषा लुङ् चात् लट् न तु स्मयोगे। पक्षे यथाप्राप्तं। वसन्तीह पुराच्छात्राः॥ अवात्सुः। अ

अवसन् । पुरा पुरा वा ॥ स्म ॥ अस्मे किं यजति स्म पुरा ॥ भविष्यतीत्यनुवर्त्तमाने । यावत्पुरानिपातयोर्लट् ॥ यावद्भुङ्क्ते । पुरा भुङ्क्ते । निपातावेतौ
निश्चयं द्योतयतः ॥ निपातयोः किं । यावद्दास्यते तावद्भोक्ष्यते । करणभूतं यावत्पुरा स्यास्यति ॥ विभाषा कदाकर्ह्योः ॥ भविष्यति लट् स्या
त् । कदा कर्हि वा भुङ्क्ते भोक्ष्यते भोक्ता वा ॥ किंवृत्ते लिप्सायां ॥ भविष्यति लड्वा स्यात् । कं कतरं कतमं वा भोजयसि भोजयिष्यसि भो
जयिता वा सि वा । लिप्सायां किं । कः पाटलिपुत्रं गमिष्यति । लिप्स्यमानसिद्धौ च ॥ लिप्स्यमानेनान्नादिना स्वर्गादेः सिद्धौ गम्यमा
नायां भविष्यति लड्वा स्यात् । योऽन्नं ददाति दास्यति दाता वा स स्वर्गं याति यास्यति याता वा ॥ लोडर्थलक्षणे च ॥ लोडर्थः
प्रेषादिर्लक्ष्यते येन तस्मिन्नर्थे वर्त्तमानाद्धातोर्भविष्यति लड्वा स्यात् ॥ कृष्णश्चेद्भुङ्क्ते त्वं गाश्चारय । पक्षे लृट् लुटौ ॥ लिङ् चोर्ध्वमौ
हूर्त्तिके ॥ मुहूर्त्तमुहूर्त्तादूर्ध्वं ऊर्ध्वमौहूर्त्तिकं ॥ निपातनात्समासः उत्तरपदवृद्धिश्च । ऊर्ध्वमौहूर्त्तिके भविष्यति लोडर्थलक्षणे वर्त्त
मानाद्धातोर्लिङ् लटौ वा स्तः ॥ मुहूर्त्तादुपरि उपाध्यायश्चेदागच्छेत् । आगच्छति आगमिष्यति आगन्ता वा अथ त्वं छन्दोऽधीष्व ॥ —

वर्त्तमानसामीप्ये वर्त्तमानवद्वा ॥ समीपमेव सामीप्यं स्वार्थे ष्यञ् । वर्त्तमाने लड्, त्यारभ्य उणादयो बहुलमिति यावत् येनोपाधिना प्रत्य
108 या उक्तास्ते तथैव वर्त्तमानसमीपे भूते भविष्यति च वा स्युः । कदागतोसि । अयमागच्छामि । अयमागमं । कदागमिष्यसि । एष गच्छामि । गमि
ष्यामि वा । आशंसायां भूतवच्च ॥ वर्त्तमानसामीप्य इति नानुवर्त्तते । भविष्यति काले भूतवत् वर्त्तमानवच्च प्रत्यया वा स्युः । आशंसायां देवश्चे
द्वर्षति [illegible] वर्षति वर्षिष्यति वा धान्यमवाप्स्म वपामः । वप्स्यामो वा । सामान्यातिदेशे विशेषानतिदेशः तेन लङ् लिटौ न । क्षिप्रवचने
लृट् ॥ क्षिप्रपर्यायेषूपपदेषु सर्वविषये लृट् स्यात् । वृष्टिश्चेत् क्षिप्रमाशु त्वरितं वा यास्यति । शीघ्रं वप्स्यामः ॥ नेति वक्तव्ये लृड्ग्रहणं लुङोऽपि दा३॥१०८॥।
विषये यथा स्यात् । श्वः शीघ्रं वप्स्यामः । आशंसावचने लिङ् ॥ आशंसावाचिन्युपपदे भविष्यति लिङ् स्यान्न भूतवत् ॥ गुरुश्चेदुपेयादाशंसेऽधी
यीय । आशंसे क्षिप्रमधीयीय । नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः ॥ क्रियायाः सातत्ये सामीप्ये च लङ्लुटौ न ॥ यावज्जी
वमन्नमदाद्दास्यति वा ॥ सामीप्यं तुल्यजातीयेनाव्यवधानं । येयं पौर्णमास्यतिक्रान्ता तस्यामग्नीनाधित्त सोमेनायष्ट ।—

येयममावास्यागामिनी तस्याम् अग्नीनाधास्यते ।। सोमेन यक्ष्यते । भविष्यति मर्यादावचनेऽवरस्मिन् ।। भविष्यति काले मर्यादोक्तावव
रस्मिन्प्रविभागेऽनद्यतनवन्न । योयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यदवरं कौशाम्ब्याः तत्र सक्तून्पास्यामः ।। कालविभागे चानहो
रात्राणां ।। पूर्वसूत्रे सर्वमनुवर्तते । अहोरात्रसंबन्धिनि विभागे प्रतिषेधार्थमिदं । योगविभाग उत्तरार्थः । योयं वत्सर आगामी तस्य
यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे ।। अनहोरात्राणां किं । योयं मास आगामी तस्य योवरः पंचदशरात्रः तत्राध्येतास्म
हे । परस्मिन्विभाषा ।। अवरस्मिन्वर्ज्यं पूर्वसूत्रद्वयमनुवर्तते । अत्रानवि[illegible]षयं । योयं संवत्सर आगामी तस्य यत्परमाग्रहाय
अध्येतास्महे ३ ण्यास्तत्राध्येष्यामहे । लिङ्निमित्ते लृङ्क्रियातिपत्तौ ।। भविष्यतीत्येव । सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभवि[illegible]ष्यत् । भूते
च । पूर्वसूत्रं सर्वमनुवर्तते । वोताप्योः ।। आ उताप्योरिति छेदः । उताप्योरित्यतः प्राग्भूते लिङ्निमित्ते लृङ् वेत्यधिक्रियते । पूर्वसूत्रं
तु उताप्योरित्यादौ प्रवर्तत इति विवेकः ।। गर्हायां लडपिजात्वोः ।। आभ्यां योगे लट्स्यात्कालत्रये गर्हायां लुङादीन्परत्वादयं

बाधते। अपिजायां त्वजसिजाखुगणिका मा द्रक्ष्यो गर्हितमेतत्। विभाषा कथमि लिङ्। गर्ह्यामित्येव। कालत्रये लिङ् चाध्यरू। कथं धर्मं त्यजेः

169 त्यजसि वा पक्षे कालत्रय के लकाराः। अत्र भविष्यति नित्यं लृङ् भूते वा। कथं नाम तत्र भवान् धर्मं त्यक्ष्यत्। किंवृत्ते लिङ्लृटौ। गर्ह्या

यामित्येव। विभाषा द्रुना उवर्तते। कः कतरः कतमो वा हरिं निन्देत्। निन्दिष्यति वा। लृङ् प्राग्वत्। अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि। ग

र्ह्यायामिति निवृत्तं। अनवक्लृप्तिरसंभावना। अमर्षोऽक्षमा। न संभावयामि न मर्षये वा भवान् हरिं निन्देत्। निन्दिष्यति वा॥ कः कत

मः कतरो वा हरिं निन्देत् निन्दिष्यति वा। लृङ् प्राग्वत्॥ किंकिलास्त्यर्थेषु लृट्। अनवक्लृप्त्यमर्षयोरित्येतत् गर्ह्यायां चेति यावद् अनु ॥१०४॥

वर्तते। किं किलेति समुदायः क्रोधद्योतक उपपदं। अस्त्यर्थाः अस्ति भवति विद्यतयः। लिङोपवादः। न श्रद्दधे न मर्षये वा किं

किल त्वं शूद्रान्नं भोक्ष्यसे। अस्ति भवति विद्यते वा शूद्रान्नं गमिष्यसि। अत्र लृङ्। जातुयदोर्लिङ्। यदाय द्योरुपसंख्यानं। लृङोप

वादः। उतावु यत्त यदा यदि वा त्वादृशो हरिं निंदेन्नाकवक्लृपयामि न मर्षयामि। लृङ् प्राग्वत्। यच्चयत्रयोः। यच्च यत्र वा त्वं मे [illegible]वं कुर्याः न
श्रद्दधे न मर्षयामि। गर्हायां च। अनवक्लृप्त्यमर्षयोरिति निवृत्तं। यच्चयत्रयोर्योगे गर्हायां लिङ् एव स्यात्। यच्च यत्र वा त्वं शूद्रं याजयेः
अन्याय्यं तत्। चित्रीकरणे च। यच्च यत्र वा त्वं शूद्रं याजयेः आश्चर्यमेतत्। [illegible]लृङ् पदे। यच्च यत्राश्चर्यमनुमित्युपपदे चित्रीकर
णे गम्यमाने लृङ् स्यात्। आश्चर्यमंधो नाम कृष्णं द्रक्ष्यति। अयदौ किं। आ[illegible]श्चर्यं यदि सोऽधीयीत। उताप्योः समर्थयोर्लिङ्।
बाढमित्यर्थे न योः सतोर्लिङ् स्यात्। उत अपि वा हन्यादघं हरिः। समर्थयोः किं। उत दंडः पतिष्यति। अपि धास्यति द्वारं। प्रश्न
प्रच्छादनं गम्यते इतः प्रभृति लिङ् निमित्ते क्रियातिपत्तौ भूतेपि नित्यो लृङ्। कामप्रवेदनेऽकच्चिति। स्वाभिप्रायाविष्कर ॥
णे गम्यमाने लिङ् स्यान्न तु कच्चिति। कामो मे भुंजीत भवान्। अकच्चितीति किं। कच्चिज्जीवति। संभावनेऽलमिति चेत्सिद्धा
प्रयोगे। अलमर्थोत्र प्रौढिः। संभावनमित्युत्साहोऽस्ति च पि मया समर्थ्या चविपरिणम्यते। संभावनेपि लिङ् स्यात्तेच्चेत्संभावनमल

मिति। अलमि सिद्धाप्रयोगे सति। अपि गिरिं शिरसा भिंद्यात्। सिद्धाप्रयोगे किं। अलं कृष्णो हस्तिनं हनिष्यति। विभाषा धातौ
सं भावनेऽवचने ऽयदि॥ पूर्वं सूत्रमनुवर्त्तते। संभावनार्थे धातावुपपदे लिङ् वा स्यात् तच्छेद् यच्छब्दः पूर्वेण नित्ये प्राप्ते वचनं। संभाव
110 यामि भुंजीत भोद्यत्ते वा भवान्। अयदि किं। संभावयामि यद् भुंजीयास्त्वं॥ हेतुहेतुमतो लिङ्॥ वा स्यात्। कृष्णं नमेच्चेत् सुखं या
यात्। कृष्णं नंस्यति चेत् सुखं यास्यति। भा विष्यत्येवेष्यते। नेह। हंतीति पलायते। इच्छार्थेषु लिङ्लोटौ। इच्छामि भुंजी
त भुंक्तां वा भवान्॥ एवं कामये प्रार्थये इत्यादि योगे बोध्यं। कामप्रवेदने इति वक्तव्यं। नेह। इच्छन् करोति। लिङ् च। समानक
र्तृकेषु इच्छार्थेषूपपदेषु लिङ् स्यात्। भुंजीयेति इच्छति। इच्छार्थेभ्यो विभाषा वर्त्तमाने। लिङ् स्यात्। पक्षे लट्। इच्छेत्। इच्छति। का ॥११॥
मयेत। कामयते। विधिनिमंत्रणेति लिङ्। विधौ यजेत। निमंत्रणे इह भुंजीत भवान्। आमंत्रणे इहासीत। अधीष्टे पु
त्रमध्यापयेद्भवान्। संप्रश्ने किं भो वेदमधीयीय उत तर्कं। प्रार्थने। भो अनेन लभेयं एवं लोट्॥ प्रैषातिसर्गप्राप्त

कालेषु कृत्याश्च । प्रैषो विधिः । अभिसर्गः कामचारानुज्ञा । भवता यष्टव्यं । भवान् यजतां । चकारेण लोटोऽनुकर्षणं प्राप्तकालेऽर्थे

लिङ् चोर्ध्वमौहूर्तिके । प्रैषादयोऽनुवर्तन्ते मुहूर्त्तादूर्ध्वं यजेत । यजतां । यष्टव्यं । स्मे लोट् पूर्वसूत्रस्य विषये । लिङः कृत्या

नां चापवादः । मुहूर्त्तादूर्ध्वं यजतां स्म । अधीष्टे च । स्मे उपपदेऽधीष्टे लोट् स्यात् । त्वं स्मग्रध्यापय । लिङ्यदि । यच्छब्दे उ

पपदे काल समय वेलासु च लिङ् स्यात् । कालः समयो वेला यद्भुञ्जीत भवान् । अर्हे कृत्यतृचश्च । चाल्लिङ् । त्वं कन्यां वहेः । शकि लिङ्

च । शक्ये लिङ् स्यात् । चात्कृत्याः । भारं त्वं वहेः । माङि लुङ् । मा कार्षीः । कपं मा भवतु मा भविष्यति । नायं माङ् । किन्तु माशब्दः ॥ धा

तुसंबन्धे प्रत्ययाः । धात्वर्थानां संबन्धे यत्र काले प्रत्यया उक्तास्ततोऽन्यत्रापि स्युः । तिङः सर्वाख्यक्रियायाः बाधा स्यात्तद

नुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः । वसन्ददर्श । भूते लट् । अतीतश्च वासकर्तृकं दर्शनमर्थः । सोमया

ज्यस्य पुत्रो भविता । सोमेन यक्ष्यमाणो यः पुत्रस्तत्कर्तृकं भवनं । क्रियासमभिहारे लोट् । लोटो हिस्वौ वा च तध्वमोः । पौनःपु

न्त्येभृशार्थेचेद्योत्येधातोर्लोट् स्यात्तस्यचहिस्वौस्तः।तिङामपवादः।तौचहिस्वौकृत्स्नेपरस्मैपदात्मनेपदसंज्ञौस्तः।तिङ्संज्ञौचत
ध्वमौ।क्वविषयेतुहिस्वौवास्तः।पुरुषैकवचनसंज्ञेतुनानयोरतिदिश्येतेहिस्वविधानसामर्थ्यात्।तेनसकलपुरुषवचनविष
येपरस्मैपदिभ्योहिः।कर्त्तरि।आत्मनेपदिभ्यःस्वोभावकर्मकर्तृषु।।समुच्चयेऽन्यतरस्यां।।अनेकक्रियासमुच्चयेद्योत्येप्रागुक्तंवा
स्यात्।यथाविध्यनुप्रयोगःपूर्वस्मिन्।।आद्येलोड्विधानेलोट्प्रकृतिभूतएवधातुरनुप्रयोज्यः।समुच्चयेसामान्यवचन
स्य।।समुच्चयेलोड्विधौसामान्यार्थस्यधातोरनुप्रयोगःस्यात्।अनुप्रयोगाद्यपायथ्यंलडादयस्तिबादयश्च।ततःसंख्या
कालयोःपुरुषविशेषार्थस्यचाभिव्यक्तिः।।क्रियासमभिहारेद्वेवाच्ये।याहियाहीतियातियुतःपुनरतिशयेनवाया ।।१११।।
नंद्यूतस्यार्थः।एककर्तृकंवर्त्तमानंयायायानंयातीत्यस्य।।इतिशब्दस्तुभेदान्वयेतात्पर्यंग्राहयति।एवंयातः।यांति।यासि।या
थ।यातयातेतिसूत्रंयाथापध्याहियाहीत्ययासीत्।यास्यतिवा।अधीघाधीष्वेत्यधीते।अध्वंविषयेपक्षेऽधीध्वमधीध्वमितिरूप

मधीध्वे । समुच्चये तु सक्तून् पिब धानाः खादेत्यभ्यवहरति । अन्नं भुंक्ष्व दाधिकमास्वादस्वेत्यभ्यवहरते ॥ तध्वमोः सक्तून्पिबत खादतेत्यभ्य
वहरथ । भुंग्ध्वं आस्वादध्वमिति अभ्यवहरध्वे । पक्षे हि स्वौ । अत्र समुच्चीयमानविशेषणामनुप्रयोगार्थेन सामान्येनाभेदान्वयः । पक्षे
सक्तून् पिबति । धानाः खादति । अन्नं भुङ्क्ते ॥ दाधिकमास्वादते । एतेन पुरीमवस्कंद लुनीहि नंदनं मुषाण रत्नानि हरामरांगनाः ।
विग्रह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः इति व्याख्यातं । अवस्कंदनलवनादिरूपानानाद्यतनपरोक्षार्
थककर्तृको अस्वास्थ्यक्रियेत्यर्थात् । इह पुनः पुनः अवस्कंदेत्यादिरर्थ इति तु व्याख्यानं भ्रममूलकमेव ॥ द्वितीयसूत्रे क्रियास
ॐ मभिहारेत्यस्यानुवृत्तेः लोड्ं तद्विशापनेश्च । पुरीमवस्कंदेत्यादि मध्यमपुरुषैकवचनमित्यपि केचिद् भ्रम एव ॥ पुरुषव ।११२॥ ॥
चनसंज्ञेह तु नेत्युक्तत्वात् ॥ ॥ ॥ इति लकारार्थप्रक्रिया ॥ ॥ ॥ इति भट्टोजीदीक्षितविरचितायां सिद्धांतकौमु
द्यां तिङंतं समाप्तं ॥ ॥ श्री ॥ ॥ छे ॥ ॥ श्री ॥ ॥ छे ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ छे ॥ ॥ ७ ॥ ७ ॥ श्री ॥ छे ॥ श्री ॥ छे ॥

१९२